# VishvavishrutaM Bharatam

# વિશ્વવિશ્રુતં ભારતમ્

## Document Information

Text title : Vishvavishrutam Bharatam

File name : vishvavishrutaMbhAratam.itx

Category : misc, sanskritgeet, hkmeher

Location : doc_z_misc_general

Author : Harekrishna Meher meher.hk at gmail.com

Transliterated by : Harekrishna Meher

Proofread by : Harekrishna Meher

Description/comments : Svasti-Kavitanjalih

Acknowledge-Permission: Dr. Harekrishna Meher

Latest update : November 2, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2023

*sanskritdocuments.org*

# વિશ્વવિશ્રુતં ભારતમ્

ભારતં પ્રિયં ભારતમ્,
વિશ્વવિશ્રુતં ભારતમ્ ।
યસ્ય રાજતે અન્તરાત્મના
સંસ્કૃતિસ્તથા સંસ્કૃતમ્ ।
વિશ્વવિશ્રુતં ભારતમ્ ॥ (ધ્રુવમ્)॥

ધરણી પુણ્યા ભાતિ વરેણ્યા મહીયસી,
નિસર્ગ-રમ્યા સુજલા સૌમ્યા ગરીયસી ।
અતુલ્યશોભા સુરત્નગર્ભા સ્વનિર્ભરા,
ઐક્ય-ભાવના યશોવર્દ્ધના સૌખ્યભરા ।
ભારત-જનનીં લોકપાવનીં
તાં પ્રણમામઃ સન્તતમ્ ।
ભારતં પ્રિયં ભારતમ્,
વિશ્વવિશ્રુતં ભારતમ્ ॥ ૧॥

દેશ-રક્ષણે વ્રતં ભ્રાજતે નિરન્તરમ્,
વીરપુઙ્ગવૈઃ શૌર્યવૈભવૈ-ર્વિભાસ્વરમ્ ।
રાષ્ટ્રકેતનં પ્રિયં ત્રિરઙ્ગં મહોન્નતમ્,
ચિરં પ્રશસ્યં સદા નમસ્યં સમાદૃતમ્ ।
માતૃવન્દનં શુચિ-સ્પન્દનં
હૃદયે નિત્યં સઙ્ગતમ્ ।
ભારતં પ્રિયં ભારતમ્,
વિશ્વવિશ્રુતં ભારતમ્ ॥ ૨॥

જગદ્-વ્યાપિની નિયતં નવ્યા પ્રીતિમયી,
માનવતાયા ભાતિ સુપ્રભા દીપ્તિમયી ।
વિશ્વબન્ધુતા-માર્ગ-સુબન્ધા વસુન્ધરા,

આસ્તિકતાયા અસ્મિતામયી સ્વસ્તિભરા ।
એકં નીડં વિશાલ-વિશ્વં
યત્ર યથાર્થં ભાષિતમ્ ।
ભારતં પ્રિયં ભારતમ્,
વિશ્વવિશ્રુતં ભારતમ્ ॥ ૩॥

ભાતુ સર્વતઃ શુભં સૌરભં સાંસ્કૃતિકમ્,
રસાપ્લાવનં ભાતુ રાષ્ટ્રિયં નાન્દનિકમ્ ।
ભાતુ જગત્યાં ભારતીયતા-સુમાધુરી,
ભાતુ ભારતી સંસ્કૃતાઙ્કિતા પ્રિયઙ્કરી ।
સુધાવર્ષિણી સુધી-તોષિણી
સા પ્રિયભાષા નિશ્ચિતમ્ ।
ભારતં પ્રિયં ભારતમ્,
વિશ્વવિશ્રુતં ભારતમ્ ॥ ૪॥

ભાતુ સંસ્કૃતં પર્યાવરણં મહીતલે,
યાતુ દુષ્કૃતં મુદા રાજતાં હૃદસ્સ્થલે ।
લોકચરિત્રં ભાતુ પવિત્રં સુકર્મણા,
સરસી મનસો ભાતુ નિર્મલા સુદર્પણા ।
સંસ્કૃતામૃતં તનોતુ શાન્તિં
રસૈઃ સુભાવૈઃ સમ્ભૃતમ્ ।
ભારતં પ્રિયં ભારતમ્,
વિશ્વવિશ્રુતં ભારતમ્ ॥ ૫॥

– ગીત-રચના : ડૉ હરેકૃષ્ણ-મેહેરઃ

Copyright Dr.Harekrishna Meher

*VishvavishrutaM Bharatam*
pdf was typeset on November 2, 2023

Please send corrections to *sanskrit@cheerful.com*